# अष्टमोऽङ्कः ।

( ततः प्रविशति धात्रीकरावलम्बी सालङ्कारः प्रह्लादः शुक्रशिष्यो विष्णुमित्रश्च ।)

( प्रविश्य । )

**धात्री** - भद्र प्रह्लाद क्व तेऽभिलषितं तत्कथय तत्रैव गच्छामः।

**प्रह्लादः** - (सस्मितं तूष्णीं तिष्ठति ।)

**धात्री** - वत्स किमिति नो ब्रवीषि कथय तावत्तेऽभिलषितम्।

**प्रह्लादः** - भद्रे सर्वत्राप्यस्ति मेऽभिलषितं तन्न पश्यसि।

**धात्री** - वत्स तथ्यमुक्तं सर्वलोकैकनाथसुतस्य ते सर्वत्राप्यभिलषितम्।

**प्रह्लादः** - तस्यानन्योऽहं दासः।

**धात्री** - (सवात्सल्यमालिङ्ग्य। मुखं परिमृश्य।) वत्स मद्भाग्यभाजन कृतकृत्याहं ते वाक्पीयूषपानेन। (इति कपोले तं परिचुम्ब्य।) ब्रह्मन् विष्णुमित्र पश्य पश्य आबाल्यात्कीदृशोऽयं विनयी ममार्भकः।

**विष्णुमित्रः** - (स्वगतम्।) सर्वव्यापकं विष्णुमुद्दिश्यैवेयमुक्तिरर्भकस्य त्वमन्यथैव जानासि। (प्रकाशम् ।) भद्रे किमाश्चर्यम् । गरिष्ठकुलस्य नैसर्गिकीयं रीतिः।

**धात्री** - भगवन्यदाह भवाँस्तत्तथैवानुभूयते। (इति सस्पृहं प्रह्लादमुखं पश्यति।)

(ततः प्रविशति चेट्यानुगम्यमाना कयाधुः।)

**कयाधुः** - (प्रविश्य।) हञ्जे वसन्तलतिके क्वास्ति कुमारः चिरस्यानवलोकनेन तृषितं मे नयनयुगलम्।

**चेटी** - देवि धात्र्या क्वापि क्रीडार्थं नीतस्तदन्विष्यामि। (पदान्तरं गत्वा। साह्लादम्।) देवि अयं कुमारः वसुन्धराया अङ्कं भूषयति बाल्यक्रीडाभूषणेन तत्पश्यतु भवती।

**कयाधुः** - (तत्रैव स्थित्वा तद्बाल्यक्रीडां पश्यति।)

**प्रह्लादः** - भद्रे विष्णुमित्रस्येव ते अङ्को न मे प्रियः ।

(इत्युत्थाय तस्याङ्के क्रीडति।)

**विष्णुमित्रः** - (तन्मुखं परिमृश्य क्रीडनकानि ददाति।)

**प्रह्लादः** - (तैः क्रीडति।)

**कयाधुः** - (सहसोपसृत्य।) वत्स त्वयाहं विस्मृता।

**प्रह्लादः** - (सहसोत्थाय तां कण्ठे समालिङ्गति।)

**कयाधुः** - (मूद्र्धन्र्यवघ्राय चुम्बनं कृत्वा।) वत्स नेत्रासेचनकशीतलीकृताहम्।

**प्रह्लादः** - (मातृमुखमवलोक्य।) मातः क्षुधितोऽहम्।

**कयाधुः** - (सवात्सल्यम्।) तर्हि स्तन्यं पिब। (इति स्तन्यं पाययति।)

**प्रह्लादः** - (तथा कृत्वा तस्या एवाङ्के क्रीडति।)

**कयाधुः** - वत्स महती ते प्रीतिर्विष्णुमित्रे।

**प्रह्लादः** - मातर्विष्णुमित्रोऽयं तेन नैसर्गिकी मेऽस्मिन् प्रीतिः।

**कयाधुः** - पुत्र युज्यते कुलनन्दनस्य ते नैसर्गिकी प्रीतिरस्मिन्कुलाचार्यस्य शिष्ये।

**विष्णुमित्रः** - देवि भवत्या वात्सल्येन राजकुमारस्य च प्रीत्या कृतकृत्योऽहम्।

**चेटी धात्री च** - ब्रह्मँस्तथ्यमभिहितम्। महतां प्रसाद एव कृतकृत्यतायाः कारणम्।

( नेपथ्ये ।)

**कृत्वाऽऽवश्यकमधुना तिष्ठन्त्यध्यापनाय गुरुचरणाः ।।**
**तत्सावधानमनसः शिष्यास्तिष्ठन्तु भक्तितः सर्वे ।।१।।**

(श्रुत्वा।)

**विष्णुमित्रः** - देवि भद्र प्रह्लाद गच्छाम्यध्ययनाय।

**प्रह्लादः** - मातरयं गतश्चेत्केन क्रीडिष्यामि।

**कयाधुः** - वत्स गच्छत्वयमध्ययनाय ।पुनः शीघ्रमागमिष्यति। तावदाकारयामि ते सहचरान् बालकान्।

**विष्णुमित्रः** - पुनः शीघ्रमागमिष्यामि।

(इति निष्क्रान्तः ।)

**कयाधुः** - भद्रे वसुन्धरे मद्वचनात् कथय तावद्दौवारिकं कुमारसहचरान् बालकानाकारय इति ।

**वसुन्धरा** - (निष्क्रम्य। पुनः प्रविश्य।) देवि गतो दौवारिकस्तानाकारयितुम्।

(ततः प्रविशति बालकैः सह दौवारिकः।)

(प्रविश्य।)

**दौवारिकः** - जयतु जयतु देवी कुमारश्च। सम्प्राप्ता एते बालकाः।

**बालकाः** - मातः प्रणमामः।

**कयाधुः** - वत्साः सुखिनो भवन्तु।

**बालकाः** - भद्र प्रह्लाद वयं सर्वेऽपि त्वन्मार्गप्रतीक्षां कुर्वन्तस्तत्रैव स्थितास्त्वमत्रैव स्थितोऽसि।

**प्रह्लादः** - मातृसविधं मे किं दुःखं पूर्वं मन्मित्रेण विष्णुमित्रेण सह क्रीडा च कृता।

**बालकाः** - तर्हि किं नास्माकं मातरो मित्राणि च तस्माद्वयमपि गच्छामः । (इति गमनोद्योगं नाटयन्ति।)

**प्रह्लादः** - (धावनं कृत्वा।) मित्राणि मैवं रुष्यन्त्वयमागतोऽस्मि।

**कयाधुः** - वत्सा मैवं कुरुत भवन्तस्तु किमपि रूढवयस्का अयं त्वतीव बालकस्तत्क्षन्तव्यम्। किञ्च। पश्चान्मोदकान्यप्यहं दास्ये।

**बालकाः** - (सहर्षम्।) तर्हि दिवसावसानपर्यन्तं क्रीडिष्यामः।

**कयाधुः** - वत्स प्रह्लाद त्वं मित्रैस्सह यथाभिलषितं क्रीड। पीडाजनकमुपद्रवं मा कृथाः। अहं तावत् गृहकृत्याय गच्छामि।

**प्रह्लादः** - मातः त्वं गमिष्यसि चेत् क्षुधितं तृषितं मां को वा सम्भावयिष्यति।

**कयाधुः** - (सवात्सल्यं सानन्दाश्रु। तमालिङ्ग्य परिचुम्ब्य च।) वत्स किमेवं वदसि सर्वेप्येते त्वदाज्ञानुवर्त्तिनः। अहमप्यधुनैवागमिष्यामि। अधुना स्तन्यमपि पिब। (इति स्तन्यं पाययति।)

**प्रह्लादः** - (तथा कृत्वा।) मातस्तृप्तोऽस्मि।

**कयाधुः** - तर्हि क्रीडानिरतो भव। भद्रे वसुन्धरे अप्रमत्ता सहचारिणी भव।

**वसुन्धरा** - यदाज्ञापयति देवी।

**कयाधुः** - वत्स गच्छामि । (इति चेट्या सह निष्क्रान्ता।)

**दौवारिकः** - कुमार स्वसेवां निर्वाहयितुं गच्छामि। (इति निष्क्रान्तः।)

**बालकाः** - भद्र प्रह्लाद का वा क्रीडा समारम्भणीया।

**प्रह्लादः** - याभिलषिता वयस्यानाम् ।

**वृकोदरः** - नेत्रमुद्रणक्रीडां करिष्यामः ।

**प्रह्लादः** - (स्वगतम्।) सम्यङ्मंत्रितं वयस्येन भगवद्ध्यानानुकूलेयं क्रीडा। (प्रकाशम्) साधु सिद्धोऽहम्।

**वृकोदरः** - तर्हि नेत्रमुद्रणाय तिष्ठ।

**प्रह्लादः** - (स्वगतम्।) अन्यनेत्रमुद्रणे मे कथं भगवद्ध्यानस्य लाभः। (प्रकाशम्) नाहं पङ्गुर्दुर्बलो वा यन्नेत्रमुद्रणाय तिष्ठामि। नेत्रमुद्रणे किंवा क्रीडासुखम्।

**वृकोदरः** - तर्हि को वा तिष्ठेत्।

**सिंहजित्** - भद्र प्रह्लाद अयमेव तिष्ठतु।

**प्रह्लादः** - साधु साध्वयमेव तिष्ठतु।

**वृकोदरः** - साध्वहं तिष्ठाम्यलं पलायनपरिश्रमेण। (इति तिष्ठति।) पूर्वं कस्य नेत्रे पिधेये।

**सिंहजित्** - प्रह्लादस्य।

**प्रह्लादः** - सज्जोऽहम्। (इति तदग्रे तिष्ठति।)

**वृकोदरः** - (तस्य नेत्रे पिदधाति।)

**प्रह्लादः** - (सध्यानम्। सभक्त्युन्मेषम्। स्वगतम्।)

**धन्योऽहमस्मि सघृणं नवकञ्जनेत्रं**
**नेत्रं दधानममलं खलु पीतमाशु ।।**
**पश्यामि चक्रदरपद्मगदाढ्यबाहुं**
**स्मेराननं मकरकुण्डलशोभितास्यम् ।।२।।**

(पुनः क्षणान्तरे। सानन्दरोमोद्गमम्।)

**त्यक्त्वा गदारियुग्मं नयनयुगं मीलयत्यसौ मेऽद्य ।।**
**करकञ्जाभ्यां विभुरथ पन्नलिनं संस्पृशामि हन्त मुहुः ।।३।।**

(इति वृकोदरस्य पादौ पश्चाद्धस्तौ कृत्वा स्पृशति।)

**वृकोदरः** - अयि वयस्य किमिदं करोषि। कथं भ्रान्त इव संवृत्तः। उत्तिष्ठ उत्तिष्ठ। सर्वेऽपि निलीनाः।

**प्रह्लादः** - (सावधानम्। स्वगतम्।) किं मया सरसिजयुगभ्रमात्प्रस्तरद्वयमिव भगवच्चरणनलिनभ्रमाद्वृकोदरस्य पादौ परिगृहीतौ। (प्रकाशम्।) वयस्य बलेन मे नेत्रे पिहिते तेन न किमपि पश्यामि तेनाहं भ्रान्त इव संवृत्तः।

**वृकोदरः** - (सलज्जम्। सकरुणम्। तस्य नेत्रे करेण परामृशति।)

**प्रह्लादः** - (सर्वान् स्प्रष्टुं धावति। ते सर्वेऽपि पलाय्य वृकोदरं स्पृशन्ति।)

**वृकोदरः** - अये वयस्य कीदृशस्त्वं शिथिलः। एतेषु न कोऽपि स्पृष्टः।

**प्रह्लादः** - (स्वगतम्।) कोऽपि स्पृष्टश्चेत्कथं मे ध्यानसिद्धिः। (प्रकाशम्।) वयस्य बालोऽहमेते सर्वेऽपि रूढवयस्काः किं करोम्यहम्।

**वृकोदरः** - तर्हि त्वं तूष्णीं स्थित्वा क्रीडाकुतूहलं पश्य।

**प्रह्लादः** - (स्वगतम्।) क्रीडाकुतूहलावलोकनेन मे को वा लाभः। (प्रकाशम्।) अहं क्रीडिष्यामि। (इति नेत्रे अपिधापयितुं वृकोदरस्याग्रे तिष्ठति।)

**वृकोदरः** - (पुनर्नेत्रे पिधत्ते।)

**प्रह्लादः** - (पुनः सध्यानम्। स्वगतम्।)

**ब्रह्मेन्दुभृद्द्विविषदुत्तमगीतकीर्तिं**
**शेषाहितल्पशयितं सुभगं घनाभम् ।।**
**योगादिभिर्न सुलभं मम नाथमेतं**
**पश्यामि भक्तिसुलभोऽस्ति यतः सदाऽसौ ।।४।।**

**वृकोदरः** - (हस्तावपसार्य ।) वयस्य उत्तिष्ठ सर्वेऽपि निलीनाः।

**प्रह्लादः** - (सचकितमुत्थाय। सर्वान् स्प्रष्टुं पलायते। सर्वेऽपि सत्वरं वृकोदरं स्पृशन्ति।)

**प्रह्लादः** - (सन्तापनं स्पृशति।)

**वृकोदरः** - वयस्य साधु कृतं पुष्टस्त्वदमात्यपुत्रस्त्वया स्पृष्टः।

**सन्तापनः** - (सक्रोधम्।) अद्मराधम त्वं किमस्य सेनाधिपपुत्रो न भवसि।

**वृकोदरः** - अहं सहस्रकृत्वोऽस्य सेनाधिपपुत्रः । भक्षामि च मोदकसहस्रं परं नाहं त्वत्सदृशो वृथापुष्टो महिषोपमः ।

**सन्तापनः** - (सक्रोधम् । चपेटिकया प्रहरति ।)

**वृकोदरः** - (सक्रोधमुत्थाय लत्तया प्रहरति।)

(इत्युभौ महान्तं कलहं नाटयतः।)

**प्रह्लादः** - वयस्यावलमलं कलहेन केलिकुतूहले।

**कोलदंष्ट्रः** - (उभौ धृत्वा दूरीकरोति।)

**प्रह्लादः** - वयस्याः प्रकृतमनुसरामः।

**वृकोदरः** - अलमलमनेन कलहकारणेन क्रीडनेन।

**फेरुस्वनः** - तर्हि क्रीडान्तरमारम्भणीयम्।

**उष्ट्राननः** - नास्मभ्यमत्र क्रीडाकरणं रोचते।

**प्रह्लादः** - तर्हि क्व गच्छामः।

**उष्ट्राननः** - बालोद्यानं गच्छामः।

**सर्वेऽपि** - साधु साधु तत्रैव गच्छामः। (इति गमनं नाटयन्ति। पदान्तरं गत्वा।)

**प्रह्लादः** - इदमुद्यानद्वारं तावत्प्रविशामः। (इति प्रवेशं नाटयन्ति।)

(ततः प्रविशति पुस्तकहस्तो विष्णुमित्रः।)

**विष्णुमित्रः** - (प्रविश्य।) क्व तावत् राजपुत्रः । कुत्र वान्वेषयामि।

**प्रह्लादः** - वयस्य वृकोदर विष्णुमित्रस्येव स्वरसंयोगः श्रूयते। तद्बहिर्गत्वाऽवलोकय।

**वृकोदरः** - (परावृत्यावलोक्य च।) अयं विष्णुमित्र आगच्छति। भगवन् विष्णुमित्र इत इतः।

**विष्णुमित्रः** - (अवलोक्य।) रे वृकोदर क्वास्ति कुमारः।

**वृकोदरः** - अत्रैवास्ति तदागच्छतु भवान्।

**विष्णुमित्रः** - (तत्रोपसर्पति।)

**प्रह्लादः** - (अवलोक्य।) भगवन् प्रणमामि।

**विष्णुमित्रः** - सद्भक्तिरस्तु।

**प्रह्लादः** - (साकूतस्मितम्।) इदमेवाशासे।

सर्वेऽपि बालकाः - भगवन् प्रणमामः।

**विष्णुमित्रः** - सर्वेऽपि सुखिनो भवन्तु।

**प्रह्लादः** - (पदान्तरं गत्वा। तमालततिमवलोक्य।)

**सद्द्विजगणसमुपास्या सत्पत्रेयं फलप्रदा नीला ॥**
**सुमनोमोदविधात्री तरुपङ्क्तिर्हरितनुं समनुकुरुते ॥५॥**

तेनेयं मे नेत्रासेचनकम्। (पुनः पदान्तरं गत्वा। कदम्बकदम्बमवलोक्य। सभक्त्युन्मेषम्।)

**व्रजवरवधूटिकानां वस्त्राहरणं विधाय विधुकुलजः ॥**
**स्थितिमकरोत्स कदम्बे तेन सुधन्याऽस्ति जातिरस्य तरोः ॥६॥**

(इति ध्यानं नाटयन्। स्वगतम्।) अयं मम प्रभुस्तेन किमपि समालपामि।

**कुण्डलचलझषमेतन्नयनेन्दीवरसुशोभमयि शौरे ।।**
**भ्रकुटीतरलतरङ्गं शृङ्गारामृततटाकमास्यं ते ।।७।।**

**गजमेढ्रः** - वयस्य किं स्तब्ध इवास्थितोऽसि।

**प्रह्लादः** - (पुरः प्रसर्प्य। सचकितम्। पुरो गत्वा कदलीखण्डमवलोक्य। सप्रेमस्मितम्।)

**हरिराधादेहद्युतिपीयूषापूर्णमेघसङ्घ इव ।।**
**कदलीदलकुलमेतद्भाति ततो नेत्रसौख्यदं मेऽस्ति ।।८।।**

(पुनः पदान्तरं गत्वा। आम्रसमूहमवलोक्य सरोमाञ्चम्।)

**वृन्दावने नटवरः कुरुतेऽवतंसं**
**यन्मञ्जरिं फलकुलं किल यस्य भुङ्क्ते ।।**
**माकन्दवृन्दमवलोक्य मनो ममैत-**
**दानन्दसागरतरङ्गनिमग्नमास्ते ।।९।।**

(पुनः पदान्तरं गत्वा। पीतजातिकादीनां केतकादीनां च सङ्घमवलोक्य।)

**श्रीवृषभानुसुताया जनकसुतायाश्च वर्णमनुकुरुते ।।**
**अपि सौरभं प्रभोर्मम रतिजनकस्तेन धन्योऽयम् ।।१०।।**

(पुनः पदान्तरं गत्वा। अशोकमवलोक्य।)

**सीताशोकावसरे छायासेवा कृता पुराऽनेन ।।**
**तेनाशोक इतीमां तरुरयमाप्तः सुशोभनां संज्ञाम् ।।११।।**

(पुनः पदान्तरं गत्वा। सभक्त्युन्मेषम्।)

**धन्यः शिरीषशाखी धत्ते मृदुतां प्रभोः स्वपुष्पेषु ।।**
**दन्तस्मितशोभामथ कुन्दाद्याः कुड्मलैश्च कुसुमैर्यत् ।।१२।।**

(पुनः पदान्तरं गत्वा। सशिरःकम्पम्।)

**दिविषज्जयादिलीलां गार्हस्थ्यं मत्प्रभोः कुशस्थल्याम् ।।**
**स्मारयतीति गुरुर्मे सुमनःश्लाघ्योऽस्ति पारिजातोऽयम् ।।१३।।**

(पुनः पदान्तरं गत्वा। मयूरानवलोक्य। सभक्त्युन्मेषम्। सपुलकम्।)

**सौभाग्यं कथयामि किन्नु शिखिनां यत्पिच्छगुच्छं विभुर्-**
**धत्ते मूर्द्धि्न च तस्य कान्तिमतुलामेते स्वकण्ठेऽनिशम् ॥**

(हंसानवलोक्य।)

**गत्या तद्गमनं यशोभरमहो वर्णेन संस्मारयन्-**
**त्येते यन्मम सर्वदा प्रियतरा हंसास्ततो वीश्वराः ॥१४॥**

**एते निसर्गतो हंसास्सत्पक्षा द्विजसत्तमाः ॥**
**मुक्तासङ्गरता युक्तं हरिसंस्मृतिहेतवः ॥१५॥**

(पुनरग्रतो गत्वा। शुकसारिकाप्रभृतीनवलोक्य। सानन्दम्।)

**एतान् कलालापपरान् स्वहस्ते**
**धृत्वा मुहुर्लापयति प्रभुर्मे ॥**
**किं भागधेयं कथयाम्यमीषां**
**तत्प्रीतिपात्रत्वमुपागतानाम् ॥१६॥**

(पुनरग्रतो गत्वा। कोकिलास्वनश्रवणमभिनीय। सशिरःकम्पम्।)

**दधिनिर्मन्थनसमये मत्प्रभुगुणगुम्फगीतिनिरतानाम् ॥**
**व्रजललनानां स्वनितं स्वस्वनितेनानुकुरुतेऽसौ ॥१७॥**

(पुनः पदान्तरं गत्वा। सभक्त्युन्मेषम्।)

**सीताविरहावसरे रसचौर्ये मत्प्रभोः सहचरा ये ॥**
**धन्यतरा ननु कीशास्तत्स्मृत्युत्पादका मम प्रेष्ठाः ॥१८॥**

(पुनरग्रतो गत्वा। कमलकुलाकुलाङ्कुल्यामवलोक्य। सरोमाञ्चम्। सशिरःकम्पम्।)

**निजपद्मैः करपद्मं नेत्रेन्दीवरमथो चरणकमलम् ॥**
**श्रीनन्दराजसूनोर्यमुनां च स्मारयत्यसौ कुल्या ॥१९॥**

(तत्र किलकमलमकरन्दलोलुपान् मधुपान् समवलोक्य। सशिरःकम्पम्।)

**रसरूपप्रभुयोगान्मेचकतामागतानि चेतांसि ॥**
**भक्तानामिव मधुपास्तत्पद इव पङ्कजेति संसक्ताः ॥२०॥**

**किंवा सद्धृत्सरसिजगर्भाद्गलितं प्रभोर्यशो ललितम् ।।**
**निजकालिमसंहृत्यै स्वच्छत्वाप्त्यै पिबन्ति संसक्ताः ।।२१ ।।**

(पुनर्निपुणं निरीक्ष्य। सानन्दाश्रु।)

**सरसिजकुलनेदिष्ठप्रोष्ठीपटलानि भान्ति चपलानि ।।**
**प्रभुवदनप्रतिबिम्बेष्विव संसक्तानि भक्तनयनानि ।।२२ ।।**

(पदान्तरं गत्वा। कुल्या जलपानमभिनीय। सानन्दम्।)

**मृष्टत्वात्स्वच्छत्वात्तापहरत्वाच्च पुष्टिकृत्त्वाच्च ।।**
**प्रभुयश इह सलिलं किल मद्धृदये स्मारयत्यदः शीघ्रम् ।।२३ ।।**

(पुनर्निपुणं निरीक्ष्य। सप्रेमस्मितम्।)

**कमलदलोदरपतिताः स्वच्छा जलविप्रुषो विभान्तीत्थम् ।।**
**मत्प्रभुजललीलायां भूषणगणतश्च्युता यथा मुक्ताः ।।२४ ।।**

(पुनरग्रतो गत्वा। जलयन्त्राण्यवलोक्य। सस्मितम्।)

**कमलाकृतिजलयन्त्रप्रसृतं धारासहस्रमिति मन्ये ।।**
**संसृतितापनिवृत्त्यै सन्मुखगलितं कथामृतं शौरेः ।।२५ ।।**

(ऊद्ध्र्वमवलोक्य। सभक्त्युन्मेषम्।)

**कुरुते करप्रसारं कमलान्याप्तुं सहस्रकर इह किम् ।।**
**मत्प्रभुपूजां कर्तुं भक्तवरस्तेन चाप्तसारूप्यः ।।२६ ।।**

**विष्णुमित्रः** - (सविस्मयम्। स्वगतम्।) अहो असुरात्मजस्यापीदृशी भक्तिर्ज्ञानं च। यत्सर्वमपि पदार्थजातं भगवत्संसृष्टत्वेन स्फुरदस्य प्रीतिपात्रं भवति तेनोत्तमोऽयम्। अहो भगवद्भक्तेर्माहात्म्यं यतो योगिनां ध्यानागोचरोऽपि प्रभुस्सहचर इवास्य ध्यानसुलभस्तस्मात्।

**योगित्वमुत्तमत्वञ्च भक्तियोगाद्भवेद्ध्रुवम् ।।**
**द्विजत्वं वनवासित्वं फलाशित्वं खगेष्वपि ।।२७ ।।**

(प्रकाशम्।) भद्र प्रह्लाद त्वं धन्योऽसि यदीदृशी ते भक्तिर्ज्ञानं च।

**प्रह्लादः** - भगवन्

**किं ज्ञानं कीदृशी भक्तिर्न जानाम्यसुरार्भकः ।।**
**दासोऽस्म्यहं यदंशश्च स मे स्वामी हरिः सदा ।।२८।।**

**विष्णुमित्रः** - भद्र तथ्यमुक्तम्। **यो यदंशः स तं भजेत्** [?] इति पौराणिका वदन्ति।

**सर्वेऽपि बालकाः** - भद्र प्रह्लाद त्वं त्वधुनैव मातृदुग्धपानं कृत्वा समागतोऽसि वयं तु क्रीडाश्रमात् क्षुधिताः स्म।

**प्रह्लादः** - (सर्वतोऽवलोक्य।) एवं चेत् फलानि भक्षयन्तु वयस्याः ।

**कीशपादः** - चेदहं वृक्षमारुह्य फलानि पातयामि । (इति वृक्षमारुह्य तत्कम्पनेन फलानि पातयति स्वयं तत्रस्थ एव फलानि भक्षयति।)

(प्रह्लादप्रभृतयो बालका अन्विष्यान्विष्य फलानि भक्षयन्ति स्थापयन्ति च निकटे पुनर्भक्षणाय नृत्यन्ति केचन फलभक्षणानन्देन।)

(ततः प्रविशति उद्यानरक्षको वारिवाहः।)

**वारिवाहः** - (प्रविश्य।) अहमुद्यानरक्षणाय महाराजेन हिरण्यकशिपुना नियुक्तस्तेन तद्रक्षणाय परिभ्रमामि। (पदान्तरं गत्वा। कर्णं दत्वा ।) अहो बालकानामिव कोलाहलः श्रूयते तेनानर्थोऽयं पर्णानि पुष्पाणि फलानि च नाशयिष्यन्ति। तेनाहं महाराजस्य दण्डपात्रीभविष्यामि। (इति सत्वरं गमनं नाटयति।) (अग्रतो गत्वा। प्रह्लादमवलोक्य।) जयतु जयतु कुमारः। किमेतेऽनर्थकारिणः कुमारस्यैव वयस्याः।

**प्रह्लादः** - एते मदीया एव वयस्याः परं त्वं कथं भीरुरिव संवृत्तः।

**वारिवाहः** - अहं तूग्रदण्डेन महाराजेनोद्यानरक्षणाय नियुक्तः बालकाश्चैते पत्राणि पुष्पाणि फलानि नाशयन्ति। तत्र मया किं करणीयम्। किं मे शरणम्।

**प्रह्लादः** - (सचकितस्तूष्णीं तिष्ठति।)

**वसुन्धरा** - भद्र वारिवाह मत्कुमारस्त्वद्वार्तया बिभेति तद्गच्छ नो चेद्देवीरोषपात्रं त्वं भविष्यसि।

**विष्णुमित्रः** - भद्र वारिवाह अलमलं महाराजदण्डशङ्कया। पश्यैते किल बालकाः कति फलानि भक्षयिष्यन्ति।

**वृकोदरः** - (करतालं दत्वा नृत्यन्।) मद्वयस्यस्याज्ञा चेदेक एवाहं सर्वाण्यपि पत्रपुष्पफलानि भक्षयामि।

**सन्तापनः** - वयस्य प्रह्लाद श्रुतं त्वया पूर्वं मयोक्तम् अद्मराधम इति सोक्तिर्मे तथ्या।

**वृकोदरः** - वयस्य प्रह्लाद दृष्टं त्वया मया पूर्वमुक्तं पुष्टतरोऽयं महिषोपमस्सोक्तिर्मे तथ्या नो चेद्वृक्षारोहणं कृत्वा कुतो वा फलानि नो भक्षयेत्।

(इत्युभौ पुनर्महान्तं कलहं नाटयतः।)

**वसुन्धरा** - अर्भका अलमलमतिकलहेन क्रीडाकुतूहले नोचेन्महाराजं देवीं च गत्वा कथयिष्यामि।

(सर्वेऽप्यर्भका भयेन तूष्णीं तिष्ठन्ति।)

**विष्णुमित्रः** - बालका अलमलमतिभयेन कुमारेण सह क्रीडां कुर्वन्तु। परं मा कलहं कुरुत।

**बालकाः** - भगवन्न वयं कलहं करिष्यामः।

**वसुन्धरा** - तर्हि सुखेन कुमारेण सह क्रीडां कुर्वन्तु।

**वारिवाहः** - अहं तावत्स्थलान्तरं गच्छाम्युद्यानरक्षणाय।

(इति निष्क्रान्तः।)

**लुलायग्रीवः** - भद्र प्रह्लाद बहूनि स्वादूनि फलानि भक्षितानि तेन सर्वेषां निरवकाशोदरत्वेन ललाटंतपतपनतापतप्ततया च तृषितास्स्मः सर्वे।

**प्रह्लादः** - इत्थं चेत्समीपतरं कुल्याजलं पिबन्तु भवन्तः।

**कीशपादः** - भद्र कोऽप्युद्यानरक्षकस्ताडयिष्यति चेत्।

**वसुन्धरा** - वत्सा यथेच्छं स्वादुजलं पिबत कोऽप्यागमिष्यति चेदहं निवारयिष्ये। परं परस्परं कलहं मा कुरुत।

**सर्वेऽपि बालकाः** - तर्हि बलिष्ठाः स्मो वयम्। स्वच्छं जलं स्वेच्छं पिबामः। (इति पानं नाटयन्ति।)

**लुलायग्रीवः** - वयस्य प्रह्लाद एहि त्वमपि सुष्ठुतरं जलं पिब।

**प्रह्लादः** - अधुनैव मया पीतं तेन न बाधते मां तृषा मृषा नाहं भणामि ।

**मकरोदरः** - वयस्य प्रह्लाद जलक्रीडां कर्तुं चेतोऽभिलषति ।

**प्रह्लादः** - भद्रे वसुन्धरे सर्वेऽपि वयस्या जलक्रीडां चिकीर्षन्ति।

**वसुन्धरा** - (सवात्सल्यम्।) वत्स याहि वयस्यैः सह जलक्रीडासुखमनुभव। परं यावत्पर्यन्तं सोपानानि तावत्पर्यन्तमेवाप्रमत्ततया विहर कुल्याया जलमग्रे गभीरतरम्।

**प्रह्लादः** - तथैव करिष्यामि। (इति कुल्यायां प्रविश्य वयस्यैः सह जलक्रीडां नाटयति। तत्र केचन निमज्जन्ति केचन बाहुतरणं कुर्वन्ति केचन मत्स्यादीन् धृत्वा विहरन्ति केचन तत्रस्थमुडुपमारुह्य विचरन्ति केचन बहिरागत्य पुनः पतन्ति केचन कमलान्युत्पाट्यावतंसयन्ति केचन तन्नालेन जलं पिबन्त्युच्छालयन्ति च जलं फूत्कारेण । केचन कराभ्यां रेचकक्रीडां कुर्वन्त्युच्छालयन्ति च जलं परस्परं केचन कमलबीजानि भक्षयन्ति च पत्रैः शब्दं कुर्वन्ति कराभ्यां केचन कीशान् धृत्वा जले पातयन्ति क्रीडन्ति च तैः साकं केचन गण्डूषैः क्रीडन्ति केचन पद्मपत्रेषु जलबिन्दून्निक्षिप्य मुक्तासदृक्षाँस्तानवलोक्य हृष्यन्ति। केचन फलानि पुष्पाणि च पातयन्ति जले केचन पिष्टगुलिकां निक्षिपन्ति जले जलचराणां भक्षणकुतुकनिरीक्षणाय।)

(ततः प्रविशति पूजापरिचारकः शिवदत्तः।)

**शिवदत्तः** - (प्रविश्य।) अहं तावत्पूजापरिचारकतया निरूपितो महाराजेन प्रियाणि च पद्मानि पद्मोद्भवस्य तत्सायंतनपूजानिर्वाहाय पद्मानि ग्रहीतुं गच्छामि कुल्याम्। (पदान्तरं गत्वा। कर्णं दत्वा।) अहो बालकानामिव कोलाहलः श्रूयते। किं तावत्तैः कमलान्युच्छिन्नानि भवेयुः। (इति द्रुततरं गमनं नाटयति। पुनरग्रतो गत्वाऽवलोक्य च। सक्रोधम्।) अहो अर्भकाणां दौरात्म्यं सकलान्यपि कमलानि त्रोटितानि। क्व गतस्तावदुद्यानरक्षकः प्रमत्तः। भवतु पूर्वमेतानेव ताडयामि।

**मर्कटाक्षः** - (सचकितमवलोक्य।) अये रासभ इव भस्मोद्धूलितसकलविग्रहः वटवृक्ष

इव स्थूलतरजटाभारवाहः रुद्राक्षगुलिकाभूषणाभूषितविग्रहः जानुयुगावलम्बिधृतवसनः स्कन्धनिक्षिप्तमलिनवस्त्रशकलः कूपोदकाहरणाय रज्जुमिव यज्ञोपवीतमावेष्टयन् क्रुद्धः पिशाच इव को वायाति।

**सर्वेऽपि** - (सचकितमवलोक्य।) हुं कोप्यायाति। (सभयं बहिर्निस्सरन्ति।)

**शिवदत्तः** - (पदान्तरं गत्वा। प्रह्लादमवलोक्य। सक्रोधम्।) जयतु जयतु कुमारः। किमेते भवत्सहचराः।

**प्रह्लादः** - (सभयम्।) ब्रह्मन् मत्सहचराः।

**शिवदत्तः** - भद्र त्वां किं कथयामि राजकुमारोऽसि। परन्त्वेते दुष्टतराः। सर्वाण्यपि पूजापद्मानि त्रोटितानि तेनैते ताडनीयाः। (इति ताडनोद्योगं नाटयति।)

**ऋक्षकरः** - (सभयं तत्पादयोः पतित्वा।) ब्रह्मन् क्षमस्व क्षमस्व वयं सर्वेऽप्यज्ञा बालकाः। (इत्युत्थाय मुद्रिकां तद्धस्तेऽर्पयति।)

**शिवदत्तः** - (शान्तक्रोधः।) साधु साधु यूयं बालका यथेच्छं विहरन्तु परन्तु पूजार्थं कानिचित्कमलानि स्थापनीयानि। (इति परावृत्य तूष्णीं गच्छति।)

**ऋक्षकरः** - (सत्वरं गत्वा।) भद्रे वसुन्धरे त्वदभयदानेन वयं सर्वेऽपि जलक्रीडार्थं प्रवृत्तास्तथाऽप्ययं द्विजाधमः शिवदत्तः कुमारं प्रह्लादमकरणिपात्रीकृत्य मुद्रिकां गृहीत्वा गच्छति।

**वसुन्धरा** - एवं चेत्तूष्णीं तिष्ठ। ब्रह्मन् शिवदत्त इत इतः।

**शिवदत्तः** - (समीपमुपसर्पति।)

**वसुन्धरा** - किं ते मुष्टौ दर्शय तावत्।

**शिवदत्तः** - (सचकितम्। स्वगतम्।) किमनया किमपि ज्ञातं भवेत् भवतु किमप्युत्तरं दास्ये। (इति मुद्रिकां दर्शयति।)

**वसुन्धरा** - कस्येयं मुद्रिका कुतो वा प्राप्ता।

**शिवदत्तः** - (सलज्जस्मितम्।) भद्रे अधुनैव महाराजेन पारितोषिकतया दत्ता नाहमतथ्यं कथयामि।

**वसुन्धरा** - (सक्रोधम्।) अरे त्वं सर्वलोकैकनाथस्य महाराजस्य पूजापरिचारकः विशेषतो ब्राह्मणश्च तथापीदृग्लोलुपः ज्ञातं ते दौरात्म्यं तावदेहि देवीसमीपं दर्शयामि ते लोलुपत्वस्य फलम्।

**शिवदत्तः** - (ऋक्षकरमवलोक्य। स्वगतम्।) अरे अनेनैव दुष्टदैत्यार्भकेन सर्वं कथितं भवेदित्यलं वाक्प्रपञ्चेन। (प्रकाशम्।) भद्रे क्षमस्व क्षमस्व । (इति मुद्रिकां निक्षिप्य निष्क्रान्तः।)

**वसुन्धरा** - वत्स मुद्रिकां गृहीत्वा याहि सुखेन विहरन्तु सर्वेऽपि कुमारेण।

**ऋक्षकरः** - (सानन्दं करतालं दत्वा सर्वं कथयति। मुद्रिकां च दर्शयति।)

(सर्वेऽपि सानन्दं नृत्यन्ति। ऋक्षकरं प्रशंसन्ति च।)

**जरत्पादः** - वयस्य प्रह्लाद क्रीडापरिश्रमवशात् सर्वेऽपि शिथिलास्स्मस्तत्स्थातुमिच्छामः।

**प्रह्लादः** - वयस्य सत्यमुक्तं नेदीयस्यत्र सभामण्डपिका तत्र स्थास्यामः। (इति सर्वेऽपि गमनं नाटयन्ति। अग्रतो गत्वाऽङ्गुल्या निर्दिश्य।)

**प्रह्लादः** - इयं सभामण्डपिका किल।

**गारुत्मतेन्द्रमणिमौक्तिकनिर्मिता च**
**वल्लीप्रसारतपनातपतापहीना ।।**
**दीनान् श्रमेण सुखिनो विदधाति रम्या**
**मीनान् सरोवरमिव स्वगतान्नु शीघ्रम् ।।२९।।**

**विष्णुमित्रः** - भद्र पश्य पश्य संसार इव तापयत्यस्माँस्तपनः। हरिमूर्त्तिरिव सुखयत्यस्मान् इयं सभामण्डपिका दर्शनमात्रेण।

**प्रह्लादः** - ब्रह्मन् साधूक्तं तेन सेवनीयेयम्।

(इति सर्वेऽपि सभामण्डपिकाप्रवेशं नाटयन्ति।)

**प्रह्लादः** - (सभामण्डपिकायां सिंहासनोपरि लुठति।)

**वसुन्धरा** - (स्वकरेणैकेन तस्य पादौ संवाहयत्यपरेण वीजयति च धवित्रेण।)

(तत्र केचन श्रमवारिसीकरान् करेण प्रोञ्छन्ति। केचन स्वपटाञ्चलेन चञ्चलेन

वीजयन्त्यात्मानम्। केचन स्वहस्ताभ्यां प्रपीडयन्ति निजपादौ। केचन शाखिसञ्चितानि फलानि भक्षयन्ति। केचन पुष्पाण्यवतंसयन्ति केचन जिघ्रन्ति च केचन आनन्दवशात् किमपि गायन्ति। केचन नृत्यन्ति च केचन शीतलायां भूमौ लुठन्ति केचन सुशीतलान् मणिस्तम्भानालिङ्गन्ति। केचन सर्वतोऽवलोक्य सभामण्डपिकां श्लाघन्ते।)

**विष्णुमित्रः** - भद्र प्रह्लाद पश्य पश्य

**सुमनोमोदसुपात्रं द्विजसङ्घैः संस्तुतं सुनीलं च ॥**
**सश्रीकं हरिगात्रं सूद्यानं साम्प्रतं समनुकुरुते ॥३०॥**

**प्रह्लादः** - (सस्मितम्।) ब्रह्मन् समीचीना ते वचनरचना तेनैव मत्प्रीतिपात्रमिदं बालोद्यानम्।

**विष्णुमित्रः** - भद्र त्वया त्वद्वयस्यैश्च युक्तसंज्ञमिदं नोचेद्वस्तुतः केवलमुद्यानमेव।

**वसुन्धरा** - ब्रह्मँस्तथ्या ते भणितिः ।

**प्रह्लादः** - (समीरणसुखमनुभूय सानन्दमर्धोन्मीलितदृष्टिः।)

**कमलाकरपरिमृष्टः पत्रिवरारूढ उद्गतिस्सर्वैः ॥**
**चक्षुष्मद्भिरदृश्यस्स्वेच्छागामी हरिरिव पवनोऽसौ ॥३१॥**

तेनातितरां मे प्रियस्तेन भद्रे वसुन्धरे कृतं कृतमनेन वीजनप्रयासेन।

**वसुन्धरा** - (तथा कृत्वा कराभ्यां तत्पादौ संवाहयति।)

**प्रह्लादः** - (सशब्दान् भृङ्गानवलोक्य सानन्दम्।)

**सततं हरिगुणगानात् कृष्णत्वं सङ्गता वियद्गतिकाः ॥**
**सुमनोरूढपदास्ते कमलारससेविनो द्विजश्लाघ्याः ॥३२॥**

**विष्णुमित्रः** - कुमार शर्करायुक्तं पय इव भगवद्गुणसंवलितं ते वाक्चातुर्यं पिबन् भृशं पुष्टिं प्राप्तोऽस्मि हृष्यामि च मुहुर्मुहुश्चेतसि धन्यतरस्त्वम्।

(नेपथ्ये।)

आर्याः क्षोदिष्ठं मां दुःखिनं रक्षत रक्षत।

(सर्वेऽपि सचकितमालोकयन्ति।)

**प्रह्लादः** - भगवन् विष्णुमित्र कस्यचिद्दुःखिनः परिदेवनमिव श्रूयते।

**विष्णुमित्रः** - हूं श्रूयते।

(ततः प्रविशति मृत्स्नालिप्तकरः साश्रुः कुम्भकारः।)

**कुम्भकारः** - (प्रविश्य। "**आर्याः**" इत्यादि पठति। पदान्तरं गत्वा। क्षणं विमृश्य।) हन्त किं करोमि क्व गच्छामि को वा मम क्षोदीयसः परिदेवनं शृणोति को वा निवारयति च दुःखम्। भवतु बालोद्यानं प्रविश्य मन्मित्रं वारिवाहं निवेदयामि। स समर्थश्चेन्निवारयिष्यति मे दुःखम्। (इत्युद्यानप्रवेशं नाटयन् उच्चस्वरेण करमुदस्य।) हन्त वारिवाह इत इतः। (पदान्तरं गत्वा कर्णं दत्वा।) किं ब्रवीषि। अहमिदानीं कार्यनिरतो नागमिष्यामि इति। हन्त किं करोमि हतोऽस्मि। (इत्युरस्ताडयन् भूमौ निपतति।)

**विष्णुमित्रः** - (अवलोक्य। सकरुणं सचकितम्।) हन्त कोऽप्ययमतिदुःखी तेन सम्भाषणीयोऽयम्। (इत्युत्थाय तत्समीपं गच्छति। सर्वेऽपि तत्र गच्छन्ति।)

**विष्णुमित्रः** - (सकरुणम्। स्वपटान्तेन वीजयन्।) भद्र कस्त्वं कथमत्रागतः किं ते दुःखं तत्कथय।

**कुम्भकारः** - (संज्ञामुपलभ्य। सदैन्यम्।) हन्त कस्त्वं मम दुःखच्छेत्ता।

**विष्णुमित्रः** - अहं तावद्राजगुरोः शुक्राचार्यस्य शिष्यः अयं राजकुमारः प्रह्लादस्तत्कथय ते दुःखम्।

**कुम्भकारः** - (साश्रुः सर्वान् प्रणम्य। "**आर्याः**" इत्यादि पठति।)

**विष्णुमित्रः** - भद्र मैवं कृथाः धैर्यमवलम्ब्य निवेदय तावद्दुःखम्।

**कुम्भकारः** - (साश्रुः सकरुणम्।) आर्याः किं भणाम्यहं हतभाग्यः मूर्खतरया मद्भार्यया शिशुर्मे पुत्रकः गृहकृत्यत्वरया बृहदामपात्रे निक्षिप्तः गता च सा गृहकृत्याय। कार्यमूढेन मया तावदनवलोक्यैव तत्पात्रं निक्षिप्तं पात्रसमूहे पाचनाय प्रज्वालितश्च सकाष्ठसमूहः पात्रसमूहोऽग्निना। पश्चात्तयोक्तं बृहदामपात्रे निक्षिप्तः क्व गतो मे पुत्रक इति तदेकाकी कथं निर्वापयाम्यग्निं तेन हतोऽस्म्युच्छिन्नवंशः। (इति मूर्च्छितः पतति।)

**विष्णुमित्रः** - (सत्वरं समुत्थाप्य।) भद्र मा खिन्थाः। प्रेषयामि सर्वान् बालकानेते

वह्निं निर्वापयिष्यन्ति।

**कुम्भकारः** - भगवन् किं बालकप्रेषणेन एतादृशे चण्डतरे ज्वलने कोमलतरस्य तस्य जीवितं कथमेतावत्पर्यन्तं सम्भावयामि।

**विष्णुमित्रः** - (सखेदम्।) तर्हि निर्विण्णोऽहम्।

**प्रह्लादः** - (स्वगतम्।) हन्त किं करोमि। ..........। अयं तु तावद्दयनीयस्तेन भूतदययोपदिशाम्येव। (प्रकाशम्। सस्मितम्।) भद्र यदि मद्वचसि श्रद्धा तर्हि किमप्युपदिशाम्युपायम्।

**कुम्भकारः** - (साञ्जलिबन्धम्।) भद्र राजकुमार त्वदाज्ञानुकारी त्वद्दासोऽहं सश्रद्धश्च।

**प्रह्लादः** - (सभक्त्युन्मेषम्।)

**ध्यायन् गदारिदरकञ्जकरं हरिं त्वं**
**दासप्रसादसुमुखं नवनीरदाभम् ॥**
**पीताम्बरं मणिविभूषणभूषिताङ्गं**
**तन्नाम तन्नतिपुरःसरमागृणन् वै ॥३३॥**

**वह्निं प्रदक्षिणीकृत्य सप्तवारं सुखी क्षणात् ॥**
**भविष्यसि न सन्देहो यदि श्रद्धायुतः प्रभौ ॥३४॥**

**कुम्भकारः** - (सभक्त्युन्मेषम्।) कुमार तथैव करिष्यामि। (इति निष्क्रान्तः।) (सर्वेऽपि साश्चर्यं तत्रैव स्थिताः।)

(ततः प्रविशति हस्तयोः शिशुं गृहीत्वा कुम्भकारः।)

**कुम्भकारः** - (प्रविश्य।) (सहर्षम्।) अयं राजकुमारस्तत्रैव तिष्ठति तदुपसर्पामि। (इत्युपसृत्य।) जयतु जयतु कुमारः। अयं ते अभयदानपात्रं दासः। (इति प्रह्लादस्य पादयोः शिशुमर्पयति।)

**प्रह्लादः** - (सलज्जं दूरं परिसर्पन्।) भद्र अलमलमनेन विनयेन समर्पय तावद्भगवच्चरणारविन्दयोरेनमर्भकं येन सञ्जीवितोऽयम्।

**कुम्भकारः** - भद्र कुमार अहं कुतो जानामि भगवन्तमज्ञः त्वत्प्रसादेन तत्प्रभावो ज्ञातोऽनुभूतश्च तेन गुरुर्मे भवाँस्तद्युक्तमिदम्।

**विष्णुमित्रः** - (सभक्त्युन्मेषम् ।) भद्र तथ्यमुक्तं त्वया परं सर्वं वृत्तान्तं कथय सर्वेऽपि श्रोतुकामा वयम् ।

**कुम्भकारः** - (सभक्त्युन्मेषम् ।) शृण्वन्तु भवन्तः कथयामि वृत्तम् । मया तावद्यथा कुमारेणोपदिष्टं तथैव कृतं परमया श्रद्धया तेन तत्क्षणमासारेणेव वह्निरभूच्छान्तः पक्वानि च मे भाण्डानि । सजीवश्चायं शिशुरुपलब्धस्तेन कृतकृत्योऽहम् । (पुनः साञ्जलिबन्धम् ।) गुरो प्रह्लाद स्वभवनं गच्छामि । (इति निष्क्रान्तः ।)

**विष्णुमित्रः** - भद्र प्रह्लाद त्वया शिशुरक्षणायोपायोऽयमुपदिष्टस्स केनाप्युपदिष्टस्स्वबुद्धिकल्पितो वा तज्ज्ञातुमिच्छामि ।

**प्रह्लादः** - भगवन्नायमुपायः पृथक्त्वेन केनाप्युपदिष्टः नापि मनःकल्पितः किन्तु प्रमाणसिद्धोऽयम् । दुःखं तावत्पापेनैव नरः प्राप्नोति तच्च भगवन्नामोच्चारणमात्रेण नश्यतीति सिद्धान्तः ।

**नाम्नोऽस्ति यावती शक्तिः पापनिर्द्दहने हरेः ।।**
**तावत्कर्त्तुं न शक्नोति पातकं पातकी जनः ।।✻✻।।**

इति पुराणप्रसिद्धेः [?] । अजामिलोपाख्यानेऽप्ययमेव निष्कर्षस्तेनायमुपायो मयोपदिष्टः ।

**विष्णुमित्रः** - भद्र साध्वी ते योजना विशेषतो महर्षेर्नारदस्यानुग्रहप्रभावः ।

**प्रह्लादः** - भगवन्नेवमेव ।

**विष्णुमित्रः** - (सर्वतोऽवलोक्य ।) भद्र पश्य पश्य

**प्रतीचिकारागयुतं दृष्ट्वा दृश्यं ह्रिया क्रुधा ।।**
**मित्रं सङ्कुचितास्याः किं कमलिन्योऽधुना सखे ।।३५।।**

तत्सायंतनीं सन्ध्यां निर्वर्तयितुं गच्छामि ।

(इति निष्क्रान्तः ।)

(नेपथ्ये ।)

भद्र एहि तावन्मोदकपात्रं गृहीत्वा मया सह ।

**प्रह्लादः** - (सचकितम्। सौत्सुक्यम्।) अये मातुरिव स्वरसंयोगः श्रूयते समागता मम माता। (इति करतालं दत्वा नृत्यति।)

(ततः प्रविशति चेट्यानुगम्यमाना कयाधुः। मोदकपात्रहस्तश्चेटश्च।)

**कयाधुः** - (प्रविश्य। परिक्रम्य। सर्वतोऽवलोक्य।) अये क्व तावन्मे पुत्रकः। अत्युत्कण्ठिते मे नयने तदवलोकनाय। हञ्जे यूथिके क्व नु तावत्क्रीडति मे पुत्रकः। कीदृशोऽयं क्रीडानिरतो यन्मां क्षुधितस्तृषितोऽपि न स्मरति।

**यूथिका** - देव्यन्वेषयामि कुमारम्। (इति पदान्तरं गत्वाऽवलोक्य च।) देवि इत इतः। अयं कुमारः बालकैः सह क्रीडति।

**कयाधुः** - (सोत्कण्ठम्। अग्रतो गत्वा।) अयं मे पुत्रकः। मन्नेत्रानन्दकरः।

**प्रह्लादः** - (कयाधुमवलोक्य। सोत्कण्ठं धावित्वा कराभ्यां तत्कण्ठमावेष्ट्य दृढमालिङ्गति।)

**कयाधुः** - (सानन्दम्। सपुलकं परिष्वज्य। मूर्द्ध्न्युपाघ्राय चुम्बनं कृत्वा स्वहस्तेन मुखं परिमृज्यावलोक्य च।) वत्स क्षुधितोऽसि।

**प्रह्लादः** - हुं भृशं क्षुधितोऽस्मि।

**कयाधुः** - (सवात्सल्यम्।) तर्हि स्तन्यं पिब। (इति स्तन्यं पाययति।)

**प्रह्लादः** - (तथा कृत्वा।) मातस्तृप्तोऽस्मि।

**कयाधुः** - वत्स तृषितोऽसि।

**प्रह्लादः** - (सशिरःकम्पम्।) नहि नहि क्षुधया सह तृषापि परिसमाप्ता पयःपानेन।

(इति सोत्कण्ठमातृवदनमालोकयति।)

**कयाधुः** - (सस्मितम्।) वत्स किं किं त्वया क्रीडितम्।

**प्रह्लादः** - (सर्वं कथयति।)

**कयाधुः** - (सवात्सल्यम्।) क्रीडाचतुरो मे पुत्रकः। (इति परिष्वजति। प्रह्लादोऽपि तथा करोति।)

**कयाधुः** - वत्स देहि ते वयस्येभ्यो मोदकान्।

**प्रह्लादः** - (सस्मितम् । सशिरःकम्पम् ।) नहि नहि मातस्त्वमेव देहि कृतं कृतमनेन हस्तस्निग्धीकरणेन ।

**कयाधुः** - वत्स तर्हि अहं दास्ये । भद्र खरोदर मत्समीपमानय मोदकपात्रम् ।

**खरोदरः** - (मोदकपात्रं तत्समीपे स्थापयति ।)

**कयाधुः** - वत्सा इत इतः । गृह्णन्तु मोदकौ । (सर्वेऽपि बालकाः सौत्सुक्यं करतालं ददतस्तस्याः समीपे गच्छन्ति ।)

(कयाधुः सवात्सल्यं द्वौ द्वौ मोदकौ ददाति ।)

(ततः केचन मोदकौ गृहीत्वा भक्षयन्ति । केचन नृत्यन्ति । केचन एकं भक्षयित्वा परं मर्कटेभ्यो ददति । केचन प्रह्लादमङ्गुष्ठं दर्शयन्तो भक्षयन्ति । केचन तत्स्वादं श्लाघन्ते केचन परस्परं तद्ग्रहणाय कलहायन्ते केचन परस्परं मुखयोर्निक्षिपन्ति । केचन तद्ग्रहणाय कयाधूपकण्ठं गच्छन्ति । कयाधुः सवात्सल्यं पुनर्ददाति ।)

(नेपथ्ये ।)

**कृत्वा स राजकृत्यं नित्यं कृत्यं समापयितुमधुना ।।**
**प्रह्लादं संद्रष्टुं सम्प्राप्तः स्वस्थितिस्थलं क्ष्मेशः ।।३६ ।।**

**कयाधुः** - (श्रुत्वा सचकितम् ।) वत्स उत्तिष्ठ उत्तिष्ठ देहि ते वयस्येभ्योऽभ्यनुज्ञां स्वगृहं गन्तुमावामपि महाराजस्य दर्शनाय गच्छावः ।

(इति निष्क्रान्तास्सर्वे ।)

**।। इति श्रीमन्नृसिंहविजयनाम्नि नाटकेऽष्टमोऽङ्कः ।।**